कक्षा – 9 वी
विषय – ज्योतिषम्
विषयकोड – 0108 (लीलावतीग्रन्थात्)

प्रश्न: 1 सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया: ।

1. 'मतङ्गाननम्' इति शब्दस्यार्थ: क: ?
2. क्रोशचतुष्टयेन किं भवति ?
3. कराणां दशकेन किं भवति ?
4. द्वात्रिंशत् इत्यनेन किमवगम्यते ?
5. को नाम गुणक: ?
6. किं नाम गुण्य: ?
7. को नाम वर्ग: ?
8. किं नाम वर्गमूलम् ?
9. 'द्विनिघ्नम्' इति शब्दस्यार्थ: क: ?
10. चतुर्णां मूलं किम् ?
11. नवानां वर्गमूलं किम् ?
12. समत्रिघात: किं भवति ?
13. नवघनं किं भवति ?
14. त्रिघनस्य घनं किं भवति ?
15. 'त्रिघ्न्या' इति शब्देन किं गृह्यते ?
16. 'लवघ्ना:' इति शब्दस्य कोऽभिप्राय: ?
17. को नाम भाजक: ?
18. किं नाम भाज्य: ?
19. 'अङ्घ्रि:' इति शब्देन किमवगम्यते ?
20. खभाजितो राशि: किं भवति ?
21. खगुण: इति शब्दस्य कोऽभिप्राय: ?

Awasthi

22. 'खेनोन्नितः' इत्यनेन किमवगम्यते ?
23. खं पञ्चयुक् किं भवति ?
24. 'स्वम्' इति शब्दस्य कोऽभिप्रायः ?
25. 'क्षुण्ण' इति शब्दस्यार्थः कः ?
26. 'पञ्चहनः' इति शब्दस्य कोऽभिप्रायः ?
27. 'त्र्यंशः' इति शब्देन किमवगम्यते ?
28. 'घनैक्यम्' इति शब्दस्य कोऽभिप्रायः ?
29. गव्यूतिमात्रे इति शब्दस्यार्थः कः ?
30. 'गच्छहृते' इति शब्दस्य कोऽभिप्रायः ?
31. पञ्चाधिकं शतं किं भवति ?
32. च्चयोद्धृतं शब्दस्यार्थः कः ?
33. माणिक्याष्टकमिन्द्रनीलदशकम् इत्यनेन किमवगम्यते ?

(मुहूर्तचिन्तामणिग्रन्थात् –)

34. 'द्विपास्यः' इति शब्दस्यार्थः कः ?
35. मुहूर्तचिन्तामणिग्रन्थस्य कर्ता कः ?
36. 'वह्निः' इति शब्दस्यार्थः कः ?
37. नन्दा तिथयः के ?
38. 'सितः' इति शब्दस्य अर्थः कः ?
39. 'अन्त्यम्' इति कस्य नक्षत्रस्य नाम वर्तते ?
40. अमा इति शब्दस्यार्थः कः ?
41. 'ब्राह्मम्' इति शब्दस्य कोऽभिप्रायः ?
42. 'मघौ' इति शब्देन किमवगम्यते ?
43. 'केदारसृभे' इति शब्दस्य कोऽभिप्रायः ?



Awadhesh

44. 'ज्योतिषी' इति शब्देन किं गृह्यते ?
45. 'नक्रः' कस्य राशेः पर्यायोऽस्ति ?
46. 'उद्वाह' इति शब्दस्य कोऽभिप्रायः ?
47. 'वैष्णवः' इति कस्य नक्षत्रस्य पर्यायोऽस्ति ?
48. 'अहिजः' इति कस्य नक्षत्रस्य पर्यायोऽस्ति ?
49. अष्टकूटाः के ?
50. अश्विनीशतभिषानक्षत्रयोः का योनिः ?
51. स्वातिहस्तयोः नक्षत्रयोः योनिः कः ?
52. सूर्यस्य मित्राणि कानि ?
53. अवर्गस्य स्वामी कः ?
54. चवर्गस्य स्वामी कः ?
55. को नाम नवांशः ?
56. का नाम होरा ?
57. को नाम त्रिंशांशः ?
58. को नाम द्वादशांशः ?
59. राज्याभिषेकः कदा शुभप्रदो भवति ?
60. 'शक्रश्रवः' इति शब्दस्यार्थः कः ?
61. 'सौरिः' इति शब्देन किं गृह्यते ?
62. 'आयगः' इति शब्दस्य कोऽभिप्रायः ?
63. त्रिकोणकेन्द्रस्थानानि कानि ?
64. 'शैलाः' इति शब्दस्य कोऽभिप्रायः ?
65. 'अनिलः' इति कस्य नक्षत्रस्य पर्यायोऽस्ति ?

प्र०२ सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः ।
(लीलावतीग्रन्थात्)

1. लीलावतीग्रन्थस्य मङ्गलाचरणं लिखत ।

Awadhesh

२. सङ्कलितव्यवकलितयोः करणसूत्रं लिखत ।
३. गुणने करणसूत्रं लिखत ।
४. गुणनस्य प्रथमप्रकारः लेखनीयः ।
5. गुणनविधेः द्वितीयप्रकारः लेखनीयः ।
6. योजनादिमानं लिखत ।
7. भागहारे करणसूत्रं लिखत ।
8. वर्गस्य प्रथमप्रकारः लेखनीयः ।
९. वर्गस्य चतुर्थप्रकारः लेख्यः ।
10. भिन्नसङ्कलितव्यवकलितयोः करणसूत्रं लिखत ।
11. भिन्नगुणने करणसूत्रं वृत्तार्धं लिखत ।
12. भिन्नवर्गादौ करणसूत्रं वृत्तार्धं लिखत ।
13. अथ व्यस्तविधौ करणसूत्रं लिखत ।
14. इष्टकर्मसु करणसूत्रं लिखत ।
15. संक्रमणे करणसूत्रं वृत्तार्धं लिखत ।
16. अन्य करणसूत्रं वृत्तार्धं लिखत ।
17. अथ त्रैराशिके करणसूत्रं लिखत ।
18. अथ भाण्डप्रतिभाण्डके करणसूत्रं लिखत ।
1९. मिश्रान्तरे करणसूत्रं लिखत ।
20. वाप्यादिपूरणे करणसूत्रं वृत्तार्धं लिखत ।
२1. अथ क्रयविक्रये करणसूत्रं लिखत ।
२२. रत्नमिश्रे करणसूत्रं लिखत ।
२3. अथ सुवर्णगणिते करणसूत्रं लिखत ।
२4. वर्णसानाय करणसूत्रं लिखत ।
२5. संकलितैक्ये करणसूत्रं लिखत ।

Awadhesh

26. कुट्यादियोगे करणसूत्रं लिखत।
27. गुणज्ञानाय करणसूत्रं वृत्तार्धं लिखत।
28. चयज्ञानाय करणसूत्रं लिखत।
29. गच्छज्ञानाय करणसूत्रं वृत्तार्धं लिखत।
30. अनन्तपदे सर्वधनसूत्रं लिखत।

(मुहूर्तचिन्तामणिग्रन्थात्)

31. ध्रुवनक्षत्राणि कानि?
32. पूर्वात्रयं किम्?
33. गुरुशुद्धिः कदा भवति?
34. रविशुद्धिः कदा भवति?
35. विवाहकारकयोगं लिखत।
36. वैधव्ययोगं लिखत।
37. कुलटायोगं लिखत।
38. विवाहस्य मासाः लेखनीयाः।
39. ज्येष्ठमासे किं विशेषः?
40. विपत्तौ विवाहविचारस्य नियमः लेखनीयः।
41. अष्टकूटानां नामानि लिखत।
42. वर्णकूटाः लेखनीयाः।
43. ताराकूटाः वर्णनीयाः।
44. गणकूटाः लेख्याः।
45. राशिस्वामिनः लेखनीयाः।
46. होराबोधकचक्रं लिखत।
47. द्रेष्काणचक्रं प्रदर्शयत।



A. Wadhwa

48. षड्वर्गाः के ?

49. गण्डान्तदोषः लेखनीयः।

50. कर्तरीदोषं लिखत।

51. दिवसस्य 15 मुहूर्ताः लेखनीयाः।

52. लत्तादोषं लिखत।

53. पातयोगं लिखत।

54. क्रान्तिसाम्ययोगं लिखत।

55. एकार्गलदोषं लिखत।

56. उपग्रहदोषः लेखनीयः।

57. कुलिकदोषं लिखत।

58. जामित्रदोषं लिखत।

59. ग्रहाणां दृष्टिः लेख्या।

60. लग्नस्थानस्य शुद्धिः लेखनीया।

61. सूर्यसङ्क्रान्तौ निषिद्धकालः वर्णनीयः।

62. शुभनवांशं लिखत।

63. सर्वथा लग्नभङ्गयोगं लिखत।

64. सूर्यादीनां ग्रहाणां स्पष्टा गतिः लेखनीया।

65. वधूप्रवेशमुहूर्तः लेखनीयः।

प्र०3. सर्वे दीर्घोत्तरीयाः प्रश्नाः समाधेयाः।

1. संख्यास्थानानि लिखत।

2. सखे नवानां च चतुर्दशानां ब्रूहि त्रिहीनस्य शतत्रयस्य।
पञ्चोत्तरस्थाप्ययुतस्य वर्गं जानासि चेद्वर्गविधानमार्गम्॥

3. घनस्य प्रकारं सोदाहरणं लिखत।

4. पञ्चघ्नः स्वत्रिभागोनो दशभक्तः समन्वितः।
राशित्र्यंशार्धपादैः स्यात् को राशिर्द्व्यूनसप्ततिः॥
इति साध्यताम्

5. एकस्य रूपत्रिशती षडश्वा अश्वा दशान्यस्य तु तुल्यमूल्याः।
ऋणं तथा रूपशतं च तस्य तौ तुल्यवित्तौ च किमश्वमूल्यम्॥ इति साध्यताम्

6. घनैक्यं राशियोगाप्तं योगार्धकृतिवर्जितम्।
त्रिभक्तं तत्पदेनोनं योगार्धं संयुतं च तौ॥
इति साध्यताम्

7. द्रम्मद्वयेन साष्टांशा शालितण्डुलखारिका।
लभ्या चेत् पणसप्तत्या तत् किं सपदि कथ्यताम्॥

8. पञ्चकेन शतेनाब्दे मूलं स्वं सकलान्तरम्।
सहस्रं चेत् पृथक् तत्र वद मूलकान्तरे॥

9. एकादीनां नवान्तानां पृथक् सङ्कलितानि मे।
तेषां सङ्कलितैक्यानि प्रचक्ष्व गणक द्रुतम्॥

10. पञ्चाधिकं शतं श्रेढीफलं सप्त पदं किल।
चयं त्रयं वयं विद्मो वदनं वद नन्दन॥

(मुहूर्तचिन्तामणिग्रन्थात्)

11. ग्रहाणां मित्रामित्रविचारं लिखत।

12. अष्टकूटेषु गणकूटस्य फलं लिखत।



Awadhesh

13. द्वादशांशबोधकचक्रं दर्शयत ।
14. सप्तशलाकाचक्रं लिखत ।
15. विवाहकालिकशुभग्रहान् लिखत ।
16. विवाहमुहूर्तः लेखनीयः ।
17. गोधूलिकालः गोधूलिप्रशंसा च लेखनीया ।
18. द्विरागमनमुहूर्तः लेख्यः ।
19. राज्याभिषेके नक्षत्रलग्नयोः शुद्धिः लेखनीया ।
20. शुक्रदोषविचारः परिहारश्च लेखनीयः ।